दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-96 | 1 | जनवरी 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लनवमी
माघ 14 प्रविष्टांशः मङ्गलमयः भवेत्


2 गणतन्त्रदिवसः राष्ट्रिययात्रायाः महत्त्वपूर्णं सोपानम्; जे.पी.नड्डा अवदत्- राष्ट्रियपर्वणि पुनः स्वसहभागितां कुर्वन्तु

3 REPUBLIC DAY 2026- रिज-प्राङ्गणे राज्यपालेन राष्ट्रध्वजः उत्तोलितः; अन्यजनपदेषु अपि उत्साहेन पालितः गणतन्त्रदिवसः

5 उत्तराखण्डज्योतिषरत्नः डॉ. चण्डीप्रसाद घिल्डियालः "दैवज्ञः" राज्यपालमहाभागेन "श्रीचक्रसम्मानेन" सम्मानितः


# गणतन्त्र-दिवसे कर्तव्य-पथि भारतस्य सांस्कृतिक-विविधतायाः सैन्यक्षमतायाः च उत्कृष्ट-प्रदर्शनम्









**हिमसंस्कृतवार्ताः -** राष्ट्रम् सप्त-सप्ततितमं गणतन्त्र दिवसम् आमानयत् । अस्मिन् अवसरे नवदेहल्यां कर्तव्यपथि राष्ट्रपतिः द्रौपदीमुर्मुः ध्वजारोहणं कृतवती। इतः प्राक् प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रिय-समर-स्मारकम् उपेत्य देशाय हुतिङ्गतेभ्यः वीरेभ्यः पुष्पाञ्जलिं समर्पितवान्। अस्य वर्षस्य गणतन्त्रदिवसस्य विषयः 'स्वतन्त्रतायाः मन्त्रः वंदे मातरम्' तथा 'समृद्धेः मन्त्रः आत्मनिर्भरभारतम्' इति आसीत् ।

## उपराष्ट्रपतिना सी.पी. राधाकृष्णन् इत्यमुना प्रधानमन्त्रिणा नरेन्द्रमोदिना, गृहमन्त्रिणा अमितशाहेन, रक्षामन्त्रिणा राजनाथसिंहेन, च देशवासिभ्यः गणतन्त्र दिवसस्य अवसरे शुभकामनाः प्रदत्ताः।

उपराष्ट्रपतिना सी.पी. राधाकृष्णन् इत्यमुना प्रधानमन्त्रिणा नरेन्द्रमोदिना, गृहमन्त्रिणा अमितशाहेन, रक्षामन्त्रिणा राजनाथसिंहेन, च देशवासिभ्यः गणतन्त्र दिवसस्य अवसरे शुभकामनाः प्रदत्ताः। उपराष्ट्रपतिना अवसरेऽस्मिन् प्रोक्तं यत् दिवसोयं भारतीयन्याय स्वतन्त्रता-समानता बन्धुत्वस्य च प्रतीकभूतः वर्तते। शाश्वत आदर्शानां प्रतीकात्मकः विद्यते दिवसोयम् एतदपि तेन प्रतिपादितम् । प्रधानमन्त्री इच्छाम् प्रकटितवान् यत् महान् अवसरोयं विकसित राष्ट्र-निर्माणाय नागरिकेषु नूतनोर्जायाः, उत्साहस्य च सेचनं करिष्यति।

## अस्य वर्षस्य गणतंत्रदिवसस्य मुख्यातिथी, यूरोपीयपरिषदः अध्यक्षः एन्टोनियो कोस्टा इत्येषः, यूरोपीय आयोगस्य अध्यक्षा उर्सुला फॉन् डेर् लायन् इत्येषा च आस्ताम्।

राष्ट्रपतिपदासीना द्रौपदीमुर्मुवर्या गणतंत्रदिवसावसरे पथसञ्चलनकार्यक्रमे मुख्यातिथिभ्यां, यूरोपीयपरिषदः अध्यक्षेन एन्टोनियो कोस्टा इत्यनेन, यूरोपीय आयोगस्य अध्यक्षया उर्सुला फॉन् डेर् लायन् इत्यनया च सह औपचारिक रथेन कर्तव्यपथं प्राप्तवती। राष्ट्रध्वजारोहणानन्तरं तत्र हि कर्तव्यपथे पञ्चाधिकैकाशत सङ्ख्याकानां एम्. एम्. लाईट्-फील्ड्-गन्स् इत्येतेषां एकविंशति-शस्त्राग्रानां अभिवादनेन सह राष्ट्रगानम् अभवत्। कर्तव्यपथि गणतन्त्रदिवसस्य पथसञ्चलने भारतस्य सांस्कृतिकवैविध्यस्य सैन्य-पराक्रमस्य च अद्वितीयं मिश्रणं प्रकाशितम् अभवत्। अस्य वर्षस्य गणतन्त्रदिवसस्य विषयः अस्ति 'स्वतन्त्रतायाः मन्त्रः वंदे मातरम्' तथा 'समृद्धेः मन्त्रः आत्मनिर्भरभारतम्' इति अस्ति। पथसञ्चलने राज्यानां, केन्द्रशासितप्रदेशानां, केन्द्रीयसर्वकारस्य मन्त्रालयानां विभागानां च त्रिंशः प्रदर्शन्यः निदर्शनानि प्रदर्शितानि अभवन्। एते प्रदर्शिन्यः सार्धेकशतवर्षाणाम् राष्ट्रगीतस्य वंदे मातरम् इत्यस्य अद्वितीयं मिश्रणं, विविधेषु क्षेत्रेषु वर्धमानस्य आतमनिर्भर राष्ट्रस्य द्रुतगत्या प्रगतिं च प्रदर्शयन्त्यः देशस्य सांस्कृतिकवैविध्यम् प्रदर्शितवत्यः।

## गणतन्त्रदिवसस्य कार्यक्रमे

### सिन्दूराभियानसमये भारतीयसैन्यबलेन प्रयुक्तानां प्रमुखशस्त्रव्यवस्थानां प्रतिरूपाणि प्रदर्शितानि

सिन्दूराभियानसमये भारतीयसैन्यबलेन प्रयुक्तानां प्रमुखशस्त्रव्यवस्थानां प्रतिरूपाणि दर्शयन्त्यः त्रयाणां सेनानां प्रदर्शिन्यः पथ सञ्चलनस्य प्रमुख-आकर्षकेषु अन्यतमाः आसन्। तत्र हि अनुक्रमम् राष्ट्रपतिः मुर्मु-वर्या भारतीय वायुसेनायाः ग्रूप्-क्याप्टन् इत्यनेन उपाधिना अलङ्कृताय शुभांशु-शुक्लाय भारतस्य सर्वोच्चं शांतिकालिकस्य शौर्यपुरस्कारं अशोकचक्रं प्रदत्तवती। राफेल, एस् यू-30, सी-295, मिग-29, अपाचे इत्यादिनानि वायुयानानि समेत्य भारतीय वायुसेनायाः ऊनत्रिंशत्सङ्ख्याकानां विमानानाम् फ़्लाईपास्ट् इत्यनेन सह सम्पूर्णगणतन्त्रदिवसः कार्यक्रमः समाप्तः। सैन्य-प्राणावधौ सार्द्ध द्विसहस्र-तोप्यधिकाः कलाकाराः सांस्कृतिकप्रदर्शनानि प्रदर्शितवन्तः, समारोहे विविधक्षेत्राणां विशेषातिथयः अपि उपस्थिताः आसन्।

## सुभाषितम्

**यत्फलं नास्ति तपसा**
**न योगेन समाधिना।**
**तत्फलं लभते सम्यक्**
**कलौ केशवकीर्तनात्।।**

भावार्थः- जो फल तप, यज्ञ अथवा समाधि से भी प्राप्त नहीं होता है वह फल कलयुग में केवल ईश्वर के कीर्तन करने मात्र से प्राप्त होता है।


दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## प्रशासनं माष सदृशानां द्विदलानां न्यूनतमसमर्थन-मूल्येन शतप्रतिशतं क्रयणं सुनिश्चेतुं कार्यं कुर्वद् अस्ति - शिवराजसिंहचौहानः



**हिमसंस्कृतवार्ताः -** कृषि-कृषक-कल्याण-मन्त्रिणा शिवराज्-सिङ्ग-चौहानेन घोषितं यत् प्रशासनं माष सदृशानां द्विदलानां न्यूनतमसमर्थनमूल्येन शतप्रतिशतं क्रयणं सुनिश्चेतुं कार्यं कुर्वद् अस्ति। नवदेहल्यां सप्तसप्ततितमे गणतन्त्रदिवसस्य अवसरे प्रशासनेन विशेषतया आमन्त्रितैः कृषकैः सह वार्तालापं कुर्वता मन्त्रिणा एतत् उक्तम्। श्री चौहानः अवदत् यत् कृषिः भारतीय अर्थव्यवस्थायाः दृढस्तम्भभूता अस्ति।

# विदेशेषु अपि सोत्साहं समाचरितः गणतन्त्रदिवसः






सप्तसप्ततितमः गणतन्त्रदिवसः न केवलं भारते प्रत्युत विदेशेषु अपि सोत्साहं समाचरितः। विदेशेषु निवसन्तः भारतीयप्रवासिनः राष्ट्रिय-त्रिवर्ण-ध्वजारोहणम् कृत्वा, देशभक्तेः उत्साहं च पूर्णरूपेण प्रदर्शितवन्तः। बीजिङ्ग-नगरे चीन-देशस्य राजदूतः प्रदीपकुमाररावतः त्रिवर्णध्वजं उत्तोलितवान्। शङ्घाई-नगरे महावाणिज्यिकदूतः प्रतीकमाथुरः एकस्मिन् कार्यक्रमे ध्वजारोहणं कृतवान्, यस्मिन् चतुश्शताधिकाः भारतीयप्रवासिनः, चीनी-समुदायस्य, रणनीतिकदलस्य च सदस्याः उपस्थिताः आसन्। अपरत्र वाशिङ्ग्टन्-नगरे अमेरिकादेशस्य विदेशसचिवः मार्को रुबियो इत्येषः भाराताय गणतन्त्रदिवसस्य शुभकामनाः प्रेषितवान्। ब्रिटन्-देशस्य राजा चार्ल्स-तृतीयः, राष्ट्रपति द्रौपदी मुर्मू-वर्यं तथा भारतस्य जनान् प्रति, कामन्वेल्थ-मूल्येषु निहितस्य चिरस्थायिनः भारत-यू, के. इत्यनयोः मिथः सहभागित्वस्य प्रशंसां कुर्वन्, गणतन्त्रदिवसस्य शुभाशयाः प्रेषितवान्। सः अहमदाबाद्-नगरे त्रिंशोत्तरद्विसहस्रतमे वर्षे कामन्वेल्थ-क्रीडायाः दा अपि भारतम् अपि अभिनन्दयत्। सिङ्गापुर् देशे भारतीय उच्चायुक्तः डा. शिल्पक् अम्बुले इत्येषः भारतीय-प्रवासी समुदायस्य नेतृत्वं कृत्वा गणतन्त्रदिवसम् आचरितवान्। जापान् देशे नियुक्ता राजदूता नग्मा एम्. मल्लिक् इत्येषा भारतीय दूतावासस्य समीपे राष्ट्रध्वजम् उत्तोलितवती। अपि च श्री लंकादेशे नियुक्तः उच्चायुक्तः सन्तोषझाः इण्डिया-हाउस् इत्यत्र ध्वजारोहणं कृत्वा आई. पि. के. एफ. इत्यस्य भारतीय-शान्तिरक्षा-बलस्य स्मारके श्रद्धाञ्जलिम् अर्पितवान्।

## अमरीका-हिमपात-झञ्झावातः

अमरीकायां भीषण शीतकालिक झञ्झावातेन दश-लक्षाधिक जनाः विद्युदापूर्तये प्रभाविताः सन्ति। वैमानिक-सेवा बाधिताः, सप्त जनाश्च मृताः। तत्रत्य टेनेसीनगरस्य स्थितिः गंभीरा जायते। हिमपातेन विद्युदाभावेजनाः गृहेषु एव तिष्ठन्ति, कार्यजातं च बाधितम्।



## गणतन्त्रदिवसः राष्ट्रिययात्रायाः महत्त्वपूर्णं सोपानम्; जे.पी.नड्डा अवदत्- राष्ट्रियपर्वणि युनः स्वसहभागितां कुर्वन्तु



**हिमसंस्कृतवार्ताः** - कार्यालयीयः प्रतिनिधिः।केन्द्रीयमन्त्री जगतप्रकाशनड्डा अवदत् यत् गणतन्त्रदिवसः भारतस्य राष्ट्रिययात्रायाः एकं ऐतिहासिकं अतीवमहत्त्वपूर्णं च सोपानम् अस्ति। २६ जनवरी १९५० दिनाङ्के संविधानस्य प्रवर्तनेन सह एव भारतं एकं 'प्रभुत्वसम्पन्न-लोकतन्त्रात्मक-गणराज्यम्' इति रूपेण स्थापितम्। सः अवदत् यत् गणतन्त्रदिवसस्य समारोहाः अस्माकं लोकतान्त्रिक-संस्थानां, संवैधानिक-मूल्यानां तथा च राष्ट्रस्य विविधतायाः प्रतिबिम्बं भवन्ति।जगतप्रकाशनड्डा अज्ञापयत् यत् अस्मिन् वर्षे ७७ तम-गणतन्त्रदिवसस्य मुख्यविषयः (Theme) 'वन्दे मातरम् इत्यस्य १५० वर्षाणि' इति अस्ति। अतः अद्यतनी परेड-शोभायात्रा, प्रदर्शिन्यः, सांस्कृतिक-प्रस्तुतयः च अस्यामेव भावनायाम् आधारिताः आसन्। सः अवदत् यत् अयं विषयः भारतस्य राष्ट्रियगीतं स्वतन्त्रतया, सांस्कृतिक-अभिव्यक्त्या तथा च वर्तमान-आकाङ्क्षाभिः सह योजयिष्यति।

**नवयुवकेभ्यः आह्वानम्**

जगतप्रकाशनड्डा युवकैः साग्रहं निवेदयत् यत् ते 'My Bharat' (मेरा युवा भारत) तथा 'My Gov' (मेरी सरकार) इति सदृशेषु मञ्चेषु आयोजितासु राष्ट्रिय-प्रतियोगितासु भागं गृहीत्वा राष्ट्रियपर्वणि स्वकीयां सक्रिय-सहभागितां स्वीकुर्वन्तु।

### गणतन्त्र-महोत्सवे सहस्राणि अतिथयः आमन्त्रिताः

सः अवदत् यत् गणतन्त्रदिवस-२०२६ इत्यस्य आयोजनेषु व्यापक-जनसहभागिता (Public Participation) सुनिश्चितं क्रियते। एतदर्थं देशस्य विभिन्नक्षेत्रेभ्यः कृषकाः, वैज्ञानिकाः, महिला-उद्यमिन्यः, छात्र-क्रीडक-अग्रिमपङ्क्ति-कर्मचारिणः (Frontline workers) सहस्राणि विशिष्टातिथयः आमन्त्रिताः आसन्।



## ओडिशा गणतंत्र दिवसः

ओडिशायां सप्तसप्ततितमः गणतन्त्र दिवसः आमान्यते। राज्यपालेन हरिबाबू कंभमपतिना भुवनेश्वरे महात्मा गांधी मार्गे राज्यस्य गणतन्त्र-दिवस-समारोहे राष्ट्रीय ध्वजः उत्तोलितः सैनिकानां पथ संचलने अभिवादनं च स्वीकृतम्।

## गुजरात - गणतन्त्रदिवसः

गुजरात-राज्ये सप्तसप्ततितमस्य गणतन्त्र दिवसस्य राज्य स्तरीयः समारोहः वाव-धराद जनपदस्य कृते अतीव गौरवास्पदं वर्तते । तत्र वाव-थराद जनपदस्य नूतन संरचनायाः अनन्तरं प्रथमवारं गणतन्त्रदिवसस्य राज्य स्तरीयः समारोहः आयोजितः । अवसरेऽस्मिन् तत्रत्य राज्यपालेन आचार्य देवव्रतेन मालूपुर-प्राङ्गणे सैन्य-प्रयाणे वीराणां अभिवादनं स्वीकृत्य, ध्वजारोत्तोलनम् कृतम्।

## राजस्थान गणतन्त्र दिवसः

राजस्थान-राज्ये पूर्ण-देशभक्ति-भावनया सह सप्तसप्ततितमः गणतन्त्रदिवसः परिपाल्यते। तत्र राज्यपालः हरिभाऊ बागडे इत्यसौ जयपुरे S.M.S इत्यस्मिन् प्राङ्गणे समायोजिते गणतन्त्र दिवस-पथ-सञ्चलन कार्यक्रमे अभिवादनं स्वीकृतवान् राष्ट्रियः ध्वजम् च उत्तोलितवान् ।

## गणतन्त्र दिवसः / सिक्किम

सिक्किम राज्ये पालजोर प्राङ्गणे सप्तसप्ततितमे गणतन्त्र दिवस समारोहे राज्यपालः ओम प्रकाश माथुरः मुख्य अतिथित्वेन विराजितः। गंगटोक नगरे समायोजिते अस्मिन् कार्यक्रमे तत्रत्य मुख्यमन्त्री प्रेमसिंह तमांगः, मुख्य सचिवः रवीन्द्र तेलंगः, सैनिकाः, राज्याधिकारिणः अन्येऽपि गणमान्य जनाः उपस्थिता आसन्। मुख्यमन्त्रिणा ध्वजारोहणं कृत्वा सैन्य उपकरणानां अन्वीक्षणं कृतम्।

## महाराष्ट्र-गणतन्त्र-दिवसः

महाराष्ट्र-राज्ये देशभक्ति भावनाया गणतन्त्र दिवसः आमानितः। तत्रस्य मुख्यमन्त्रिणा देवेन्द्र फडनवीसेन एकस्मिन् आधिकारिक-कार्यक्रमे दादर-क्षेत्रे छत्रपति शिवाजी महाराज मैदान-स्थले ध्वजारोहणं कृतम्। तत्र जनसभां सम्बोधयन् असौ भणितवान् यत् तत्रत्य प्रशासनेन दावोस-नगरे विश्व आर्थिक मञ्चे त्रिंशत् लक्षाधिक मूल्यात्मकं निवेश सन्धिपत्रं अंकितम्।

## हरियाणा-गणतन्त्र-दिवसः

हरियाणां गुरुग्रामे मुख्यमन्त्रिणा नायब सिंह सैनी वर्येण गणतन्त्र दिवस समारोहे ध्वजारोहणं कृतम्। पथ संचलने अभिवादनं स्वीकृत्य, जनेभ्यः शुभाशयाः प्रदत्ताः, तेन अवसरेऽस्मिन् डॉ. भीमराव अम्बेडकरं स्मृत्वा संविधान-सभांप्रति आदरं प्रकटितम्। एतदतिरिच्य छत्तीसगढ़े राज्यपालेन रमेन डेका वर्येण रामपुरे मुख्य समारोहे राष्ट्रीय ध्वजः उत्तोलितः, असमराज्ये राज्यपालेन लक्ष्मण-प्रसाद-आचार्येण गुवाहाट्यां ध्वजारोहणं कृतम्, आन्ध्र प्रदेशे अमरावत्यां राज्यपालेन, न्यायमूर्तिना एस. अब्दुल नजीरेण ध्वजारोहणम् कृतम्।

# REPUBLIC DAY 2026- रिज-प्राङ्गणे राज्यपालेन राष्ट्रध्वजः उत्तोलितः; अन्यजनपदेषु अपि उत्साहेन पालितः गणतन्त्रदिवसः





हिमसंस्कृतवार्ताः- शिमला। राजधान्याः ऐतिहासिके रिजप्राङ्गणे ७७ तमः गणतन्त्रदिवससमारोहः पूर्णोत्साहेन पालितः। मुख्यसमारोहे हिमाचलप्रदेशस्य राज्यपालः शिवप्रतापशुक्लः राष्ट्रध्वजं उत्तोलितवान् तथा च 'परेड' इत्यस्य अभिवादनं स्वीकृतवान्। अस्मिन् अवसरे मुख्यमन्त्री सुखविन्द्रसिंहः सुक्खूः विपक्षस्य नेता जयरामठाकुरः, लोकनिर्माणमंत्री विक्रमादित्यसिंहः अपि उपस्थिता अभवन्।

परेड- नेतृत्वं अतिरिक्त-पुलिस-अधीक्षकः मेहर पंवरः अकरोत्। मार्च-पास्ट मध्ये सेनायाः १ जे एण्ड के राइफल, आईटीबीपी (ITBP), एसएसबी (SSB), पञ्जाब-पुलिस, हिमाचल-पुलिस, एनसीसी (NCC), एनएसएस (NSS), आपदा-प्रबन्धनदलैः च राष्ट्रिय-एकतायाः प्रदर्शनं कृतम्।

अस्मिन् अवसरे विविधविभागानां (यथा- कृषिः, उद्यानं, वनं, पर्यटनं, स्वास्थ्यं, शिक्षा च) आर्षकाः प्रदर्शिन्यः प्रदर्शिताः। चौपाल-क्षेत्रस्य रितिक चौहानः 'उत्तमजीवनं रक्षा पदकेन' सम्मानितः अभवत्। सांस्कृतिक-कार्यक्रमेषु हरियाणाराज्यस्य 'घूमरनृत्यं', जम्मू-कश्मीरस्य 'डोगरा-लोकनृत्यं' प्रमुखम् आकर्षणं आसीत्।

## विविध-जनपदेषु गणतन्त्रदिवस-समारोहाः

हिमाचलस्य विविधेषु जनपदेषु अपि गणतंत्रदिवसः उत्साहेन मानितः प्रदेशसर्वकारस्य मन्त्रिणः समारोहस्य अध्यक्षताम् अकुर्वन्।

## जनपदः मुख्यातिथिः (ध्वजारोहणकर्ता) स्थानम्

**काङ्गडा** - उपमुख्यमन्त्री मुकेश अग्निहोत्री - धर्मशाला
**सोलनम्**- स्वास्थ्यमन्त्री डॉ. कर्नल धनीराम शाण्डिलः - सोलनम्
**सिरमौरः** - विधानसभाध्यक्षः कुलदीप सिंह पठानिया - नाहनम्
**बिलासपुरम्** - उद्योगमन्त्री हर्षवर्धन चौहानः - बिलासपुरम्
**लाहौल-स्पीतिः** HPTDC अध्यक्षः रघुबीर सिंह बाली - केलाङ्गम्
**कुल्लूः** - शिक्षामन्त्री रोहितठाकुरः - ढालपुरम्
**किन्नौरः** - राजस्वमन्त्री जगत्सिंहनेगी - रिकाङ्गपिओ
**मण्डी** - आयुषमन्त्री यादविन्द्रगोमा - सेरीमञ्चः
**चम्बा** - कृषि एवं पशुपालन मन्त्री प्रो. चन्द्रकुमारः - ऐतिहासिकचौगानम्
**ऊना** - तकनीकीशिक्षा मन्त्री राजेश धर्माणी -ऊना
**हमीरपुरम्** - ग्रामीणविकासमन्त्री अनिरुद्ध सिंहः -हमीरपुरम्

## समारोहाणां प्रमुखांशाः

धर्मशाला (काङ्गडा)- उपमुख्यमन्त्री मुकेश अग्निहोत्री महोदयः राष्ट्रध्वजं उत्तोल्य परेड- अभिवादनं स्वीकृतवान्। सः प्रदेशस्य विकासे सैन्यबलानां नागरिकाणां च योगदानं श्लाघितवान्।

सोलनम्- स्वास्थ्यमन्त्री डॉ. कर्नल धनीरामशाण्डिलः ध्वजारोहणं कृतवान्। सः स्वास्थ्यक्षेत्रे जायमानानां विकासानां जनहितकारी- योजनानां च चर्चां कृतवान्।

केलाङ्गम् (लाहौल-स्पीति)- तीव्र-शैत्यस्य हिमपातस्य च



मध्ये रघुबीरसिंहः बाली महोदयः तिरङ्गं ध्वजं उत्तोलितवान्। जनजातीय-जनानां उत्साहः अत्र विशेषः आसीत्।

नाहनम् (सिरमौर):- विधानसभाध्यक्षः कुलदीपसिंह पठानिया नाहन-क्षेत्रे ध्वजारोहणं कृत्वा भारतीयसंविधानस्य गरिमायाः बोधं कारितवान्।

बिलासपुरम्- उद्योगमन्त्री हर्षवर्धनचौहानः परेड-निरीक्षणं कृतवान्। सः जनपदे प्रचलतः औद्योगिकविकासस्य विषये सूचनां दत्तवान्।अस्मिन् दिवसे सर्वत्र आरक्षकाणां (Police), होमगार्ड-दलानां, एनसीसी (NCC) छात्राणां च मार्च-पास्ट अभवत्। विविधविभागानां प्रदर्शिन्यः अपि आकर्षकाः आसन्। सांस्कृतिक-कार्यक्रमेषु देशभक्तिगीतानि, लोकनृत्यानि च प्रदर्शितानि, येन सम्पूर्णः हिमाचलप्रदेशः राष्ट्रियभावनया आप्लावितः अभवत्।

# गणतन्त्रदिवसः २०२६- देहल्यां कर्तव्यपथि हिमाचलसंस्कृतेः प्रदर्शनम्; देशाय प्रदत्ताः सहस्राधिकाः वीरतापुरस्कारविजेतारः

**हिमसंस्कृतवार्ताः- नवदेहली।** गणतन्त्रदिवसस्य शोभायात्रायाः (Parade) कृते भारतसर्वकारस्य रक्षा-मन्त्रालयेन देशस्य १७ राज्याणां दृश्यानां चयनं कृतम् आसीत्, येषु हिमाचलप्रदेशस्य दृश्यम् अपि सम्मिलितम् आसीत्। सोमवासरे हिमाचलस्य अनेन दृश्येन एतत् प्रकटितं यत् हिमाचलं न केवलं देवी-देवतानां भूमिः अस्ति, अपितु निर्भीक- देशभक्तेः अपि धरा वर्तते। अनेन दृश्येन स्वस्य वीरपुत्राणां पुत्रीणां च प्रति श्रद्धाञ्जलिः अर्पिता।एतद् दृश्यम् अस्मिन् विचारे आधारिता आसीत् यत् अयं प्रदेशः, यः 'देवभूमिः' इति पूज्यते, सः तावानेव 'वीरभूमिः' अपि अस्ति।

**वीरतापुरस्काराणां गौरवशाली अङ्कसूची**

हिमाचलप्रदेशेन देशाय १,२०३ वीरतापुरस्कारविजेतारः प्रदत्ताः सन्ति, ये भारते सैन्य-इतिहासे शौर्यस्य एकम् असाधारणं कीर्तिमानं स्थापयन्ति। एतेषु प्रमुखाः सन्तिः-परमवीरचक्रम् – ०४, अशोकचक्रम् - ०२

महावीरचक्रम् – १० गणतन्त्रदिवसस्य अनेन दृश्येन राज्यस्य अस्याः अदम्य-भावनायाः गौरवगानं कृतम्। इयं तान् हिमाचलस्य सुपुत्रान् सुपुत्रीः च सम्मानितवती, ये हिमालयात् सहनशक्तिं प्राप्य बलिदानस्य शौर्यस्य च मार्गेण देशस्य आह्वानस्य उत्तरं दत्तवन्तः।

रक्षादलेषु भारतस्य बृहत्तम-योगदानकर्तृषु अन्यतमः हिमाचलम् अस्ति। अस्य विरासतं न केवलं भूतकाले सीमिता अस्ति, अपितु अत्रत्य-जनानां चरित्रे अपि गभीरतया व्याप्ता अस्ति। अस्य दृश्यस्य मुख्योद्देश्यं 'पवित्रता' तथा 'वीरता' इत्यनयोः समन्वयः आसीत्, यत्र राज्यस्य सांस्कृतिक-समृद्ध्या सह तस्य गौरवान्विता सैन्यपरम्परा अपि दर्शिता। एतत् एकं शक्तिशालीं स्मारकमस्ति यत् हिमाचलप्रदेशः देवी-देवतानां आशीर्वादेन तथा निर्भीक-देशभक्त्या च परिपूर्णः अस्ति- 'देवभूमौ स्थिता एका सत्या 'वीरभूमिः' इति।



# हिमाचले ८३५ मार्गाः, १९४२ विद्युत्-परिवर्तकाः च स्तब्धाः; २४५ पेयजलयोजनाः प्रभाविताः



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशे अद्यापि ८३५ मार्गाः पिहिताः सन्ति, येषु त्रयः राष्ट्रियमार्गाः अपि सम्मिलिताः। अपि च, १९४२ विद्युत्-परिवर्तकाः दोषपूर्णाः सन्ति, येन राज्यस्य शताधिकेभ्यः ग्रामेभ्यः विद्युतापूर्तिः अवरुद्धा जाता। हिमपातस्य कारणेन २४५ पेयजलयोजनाः अपि बाधिताः सन्ति, येन जनाः जलकष्टं अनुभवन्ति।

## मार्गाणाम् अवरोध-विवरणम्

राज्ये सर्वाधिकं प्रभावः शिमला-जनपदे जातः, यत्र २३४ मार्गाः बद्धाः सन्ति। अस्य उपमण्डलानां विवरणं एवमस्ति-

रोहडू - ७८ मार्गाः

कोटखाई - ६० मार्गाः

मण्डी-जनपदः- ११० मार्गाः (सिराज-क्षेत्रे सर्वाधिकं ६०)

लाहौल-स्पीतिः २८० मार्गाः (एनएच-३ तथा एनएच-५०५ अपि अवरुद्धौ)

चम्बा - ७८ मार्गाः (पाङ्गी-क्षेत्रे ३५)

कुल्लूः - ६४ मार्गाः (एनएच-३०५ अपि स्तब्धः)

## विद्युत्-व्यवस्थायाः स्थितिः

राज्य- आपातकालीन- परिचालन- केन्द्रेण (SEOC) दत्त- सूचनया ज्ञातं भवति यत् शिमलाजनपदे सर्वाधिकं ७८९ परिवर्तकाः अवरुद्धाः सन्ति।

अन्यजनपदेषु स्थितिः-

सिरमौरे - ३५४

मण्ड्यां - २८४

चम्बायां - २७७

कुल्लौ - १७४

## पेयजल-सङ्कटम्

हिमपातकारणेन राज्ये २४५ जल-आपूर्ति- योजनाः बाधिताः। एतेषु शिमलायां १३१, कुल्लूक्षेत्रे ८१, चम्बायां २४ तथा सिरमौर-जनपदे ९ योजनाः प्रभाविताः सन्ति।

# हिमाचलप्रदेशे अद्य रात्रितः पुनः जलवायोः विकारः भविष्यति

## सप्तविंशतितमे (27) दिने अतिवृष्टेः हिमपातस्य च नारङ्ग-अलर्टः घोषितः

**हिमसंस्कृतवार्ताः शिमला।** हिमाचलप्रदेशे हिमपातानन्तरं रविवासरे तृतीयं दिनमपि स्थितयः न सम्यक् जाताः। मार्गाणाम् अवरोधात् सहस्रशः पर्यटकाः विभिन्नेषु स्थानेषु अवरुद्धाः अभवन्। मनाली– लेह, आनी–कुल्लू, शिमला–रामपुर राष्ट्रियमार्गान् सहित ८३२ मार्गाः अवरुद्धाः आसन्। प्रदेशे प्रायः १,९४२ विद्युत्-परिवर्तकाः (ट्रांसफार्मराः) निष्क्रियाः जाताः, येन अनेकेषु क्षेत्रेषु अद्यापि अन्धकारावस्था वर्तते। जल-आपूर्तेः २४५ योजनाः अपि प्रभाविताः। रोहताङ्ग-दर्रां सहितं लाहौल, मनाली इत्यस्य उच्चशिखरेषु रविवासरे हिमपातः अभवत्। सोमवासरे कुल्लूजनपदे २००० मीटरात् अधिकोच्चक्षेत्रे न्यून- जोखिम- स्तरस्य हिमस्खलनस्य सम्भावना सूचिता अस्ति।मौसमविज्ञानकेन्द्रं शिमला इति अनुसारं, सोमवासर- रात्रितः वातावरणस्य स्वभावः पुनः विकृतः भवितुं शक्नोति। सप्तविंशतितमे दिने चम्बा, कुल्लू, किन्नौर तथा लाहौल–स्पीति जनपदेषु अतिवृष्टेः हिमपातस्य च नारङ्ग-अलर्टः निर्गतः अस्ति। प्रदेशस्य अन्येषु जनपदेषु पीत अलर्टः जारीकृतः। एकत्रिंशतितमे (31) दिने पुनः मौसमस्य परिवर्तनं भविष्यति। राज्यस्य अधिकांशेषु भागेषु षड्विंशतितमे (26) रात्रितः अष्टाविंशतितमे (28) प्रातःकालपर्यन्तं भारी-वृष्टेः सम्भावना अस्ति। सप्तविंशतितमे दिने कतिपयेषु स्थानेषु एक-द्वयोः स्थानेषु अति -वृष्टेः हिमपातस्य च अनुमानः सन्ति।शिमला तथा काङ्गड़ा-जनपदे रविवासरे दिवाभागे सूर्यप्रकाशः दृश्यते स्म, तथापि शीतलहरस्य प्रभावः निरन्तरं आसीत्। रविवासरे बहवः पर्यटकाः हिमे अवरुद्धानां स्वीय-यानानां निष्कासनं कर्तुं न अशक्नुवन्। शिमलातः किन्नौर-जनपदस्य सम्पर्कः विच्छिन्नः आसीत्। कुफरी मार्गः केवलं चतुष्चक्र- चालित- यानानां (Four by Four) कृते एव उद्घाटितः आसीत्।रविवासरे सम्पूर्णं दिनं नारकण्डा पिधित आसीत्। शिमलातः किन्नौर-जनपदस्य सम्पर्कः अपि विच्छिन्नः अस्ति। मनाली–केलाङ्ग मार्गः चतुष्चक्र- चालित- यानानां कृते पुनः उद्घाटितः। रविवासरे सिस्सू-प्रदेशात् पर्यटकानां उद्धारण-कार्यं निरन्तरं प्रचलितम्। भरमौरप्रदेशे लुप्तस्य युवकस्य किशोरस्य च अन्वेषणाय सेनायाः ऊर्ध्वगामी- विमानानि तथा एस. डी. आर. एफ दलानि आगतानि। अद्यापि तयोः युवयोः किमपि चिन्हं न प्राप्तम्। सीमा-मार्ग-संगठनं (BRO) रोहताङ्ग- अटल- टनलमार्गेण मनाली–केलाङ्ग मार्गं वाहन- आवागमनाय एक-पङ्क्त्यां पुनः उद्घाटितवान्। मार्गस्य उद्घाटनानन्तरं केलाङ्ग, जिस्पा, सिस्सू, गोंधला-प्रदेशेषु अवरुद्धाः २०० अधिकाः पर्यटकाः उद्धारिताः। मण्डी-जनपदे ५०० अधिकाः विद्युत्-परिवर्तकाः निष्क्रियाः सन्ति। १०२ मार्गेषु अद्यापि यातायातः बाधितः अस्ति। चम्बा-जनपदे ७८ मार्गाः अवरुद्धाः सन्ति। २४० परिवर्तकानां अवरोधात् शताधिकेषु ग्रामेषु विद्युत्-संकटं वर्तते।

### पञ्च जनपदेषु तापमानं शून्यस्य अधः

प्रदेशे शीतस्य तीव्रता निरन्तरं वर्धते। पञ्च जनपदेषु तापमानं शून्यस्य अधः अभवत्। नारकण्डायां –१.१, सराहणे –०.३, किन्नौरे कल्पायां –४.०, रिकाङ्गपिओ –०.७, लाहौल्–स्पीतौ कुकुमसेयाँ –७.९, ताबो –१०.०, कुल्लौ मनाल्यां –१.१ तथा काङ्ड़ायां धर्मशालायां –०.६ डिग्री सेल्सियस् तापमानं अभिलेखितम्। शिमलायां न्यूनतमं तापमानं २.५ डिग्री सेल्सियस् आसीत्।

### पर्यटन-स्थलेषु यातायात-अवरोधेन वर्धिता समस्या

नवीन- हिमपातानन्तरं हिमाचल प्रदेशस्य पर्यटनस्थलेषु पर्यटकानां महती संख्या दृश्यते। शिमला, कुल्लू–मनाली, चायल, कसौली इत्यादिषु पर्यटनस्थलेषु वाहनानां अधिकसंख्यया यातायातव्यवस्था अत्यन्तं बाधिता। हिमे क्रीडां कर्तुम् आगताः पर्यटकाः रविवासरे स्वयानानाम् अन्तः एव अवरुद्धाः आसन्। दीर्घ-यातायात- अवरोधात् पर्यटकाः मार्गस्थे हिमे एव चित्राणि गृहीतवन्तः। राजधानी शिमलायां कार्ट-रोड मार्गे ४–६ होराभ्यः पर्यटकाः स्थानिकजनाः च अवरोध- कारणात् क्लेशम् अनुभूतवन्तः।

अन्यतः, प्रदेशे पर्यटकानां वृद्ध्या पर्यटन- व्यवसायिनः अत्यन्तं हर्षिताः सन्ति। आगामिदिवसेषु अपि पर्यटनस्थलेषु पर्यटकानां आगमनं निरन्तरं भविष्यति इति अपेक्षा। होटल तथा रेस्टोरेंट संघस्य अध्यक्षः गजेन्द्रचन्द ठाकुरः अवदत् यत् हिमपातानन्तरं सहसा बहुसंख्यकाः पर्यटकाः पर्यटनस्थलेषु आगताः। सप्ताहान्तस्य सह षड्विंशतितमे (26) जनवरी-दिने अवकाशस्य कारणात् रविवासरे अधिकसंख्यया पर्यटक- यानानि पर्यटनस्थलेषु प्रविष्टानि।

# जी.डी. गोयनका पब्लिक विद्यालयः गणतन्त्रदिवस समारोहः




**हिमसंस्कृतवार्ता- कुणाल कौशिक मोतिहारी।** जी. डी. गोयनका पब्लिक विद्यालये 26 जनवरीदिने 77तमः गणतन्त्रदिवसः महान् उत्साहेन, गौरवेण च देशभक्तिभावेन सह सम्यक् रूपेण आचरितः। कार्यक्रमस्य शुभारम्भः जागृति भाटिया महोदयायाः कृतस्वागतभाषणेन अभवत्। तया विद्यालयस्य प्रबन्धनं समस्तं कर्मचारीवर्गं च अभिनन्द्य गणतन्त्रदिवसस्य महत्वं स्पष्टतया विवृणोति। सा अवदत्- "शिक्षकत्वेन अस्माकं कर्तव्यं अस्ति यत् विद्यार्थिषु स्वातन्त्र्यस्य, एकतायाः, उत्तरदायित्वस्य च मूल्यानि संस्कारयेम, येन ते भविष्ये उत्तरदायिनः संवेदनशीलाश्च नागरिकाः भवितुं शक्नुवन्ति।"तत्पश्चात् विद्यालयस्य माननीयः प्रबन्धन्यासी कृष्णकुमारमहोदयः राष्ट्रीयध्वजम् आरोहयत्। राष्ट्रगानस्य समये सम्पूर्णं वातावरणं देशभक्त्या गौरवेण च परिपूर्णम् अभवत्। अस्मिन् पावने अवसरः विद्यालयस्य सर्वे विद्यार्थिगणाः कर्मचारिवर्गश्च मिष्ठान्नैः सम्मानिताः, येन आनन्दोत्साहपूर्णं वातावरणं निर्मितम्। कार्यक्रमः देशभक्त्या, कृतज्ञताभावेन, परस्परैक्यस्य भावनया च सफलतया सम्पन्नः।

# उत्तराखण्डज्योतिषरत्नः डॉ. चण्डीप्रसाद घिल्डियालः
## “दैवज्ञः” राज्यपालमहाभागेन “श्रीचक्रसम्मानेन” सम्मानितः




**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, देहरादूनम्।** राष्ट्रीयज्योतिषमहाकुम्भस्य समापनावसरे मुख्यातिथिरूपेण आगतेन महामहिम्ना राज्यपालेन लेफ्टिनेन्ट जनरल गुरमीतसिंहमहाभागेन उत्तराखण्डज्योतिषरत्नः आचार्यः डॉ. चण्डीप्रसादः घिल्डियालः “दैवज्ञः” इति ख्यातः “श्रीचक्रसम्मानेन” सम्मानितः। अस्मिन् अवसरे अन्ताराष्ट्रियजगतः केवलं द्वादश ज्योतिषविदां मध्ये डॉ. घिल्डियालेन सह राज्यपालमञ्चे उपवेशनस्य सौभाग्यमपि प्राप्तम्।स्वीयसम्बोधने राज्यपालमहाभागः अवदत्- “अन्ताराष्ट्रियस्तरे प्रतिष्ठिताः ये द्वादश ज्योतिषविदः मया सह मंचे विराजन्ति, ते वास्तविकरूपेण राष्ट्रस्य, अन्ताराष्ट्रियजगतः ज्योतिषविद्यायाः संवाहकाः, ब्राण्ड-अम्बेस्डर चेति रूपेण अपि कार्यं कुर्वन्ति। ज्योतिषविद्या क्वाण्टमिति सिद्धान्ताधिष्ठिता विद्या अस्ति, या समाजस्य सर्ववर्गाणां सम्यक् मार्गदर्शनं करोति।”एतेषु एव आचार्येषु ए. दुबे पद्मेशः, अजय भाम्बी, पण्डितः लेखराज शर्मा, पण्डितः सतीश शर्मा इत्यादयः “श्रीकीर्तिचक्रसम्मानेन” सम्मानिताः। राज्यपालमहाभागेन उक्तं यत्- राष्ट्रोन्नतौ एतेषां महत् दायित्वम् अस्ति, यतः राजनेतारः, उच्चाधिकारिणः, न्यायाधीशाः, व्यापारीवर्गः, महिलावर्गः, युवावर्गश्च एतेषां प्रेरणया दिव्यानि कर्माणि कुर्वन्ति। अस्मिन् समारोहसमये उत्तराखण्ड- ज्योतिषपरिषदः अध्यक्षः आचार्यः रमेश सेमवालः, संस्कृतशिक्षासचिवः दीपक गैरोला, डॉ. पी.पी.एस. राणा, पूजा अवस्थी, शुभी गुप्ता, पण्डितः रामलखन गैरोला इत्यादयः संस्कृतजगतः प्रख्याताः विद्वांसः उपस्थिताः आसन्।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। एका रोचिका वार्ता अस्ति। एकया रष्या-देशीयया पित्रोः प्रतिक्रिया चित्रिता।
काव्या (अनुवर्तते)- भारतस्य यान-ध्वनिः तैः श्रुतः। पिता आश्चर्यचकितः जातः। तेन पृष्टम् - "किमर्थम् एतावान् कोलाहलः क्रियते?" इति।
**नन्दिनी-** तत् तु विनोदपूर्णम्। अन्यत् श्रूयताम्। चीन-देशीय-बालकेन मातुः जन्मदिनार्थं धनं सङ्गृहीतम्।
नन्दिनी (अनुवर्तते)- षण्मासान् यावत् प्रयासः कृतः। तेन उपहारः क्रीतः। आपणिकेन तत् दृष्टम्, सः भावुकः जातः।
**काव्या-** अहो, साधु। अपि त्वया श्रुतम्? कानडा-वासिन्या कयाचित् यात्रिक-प्रभाविकया निन्दिताः अन्याः।
काव्या (अनुवर्तते)- तया उक्तं यत् भारतस्य दारिद्र्यम् एव तैः प्रदर्शितम्। एतत् अयोग्यम् अस्ति इति तया प्रतिपादितम्।
**नन्दिनी-** सत्यम् उक्तं तया। अन्त्ये, एका शुनक-कथा। "पालनायोग्यः" इति मत्वा शुनकः त्यक्तः।
नन्दिनी (अनुवर्तते)- किन्तु कयाचित् महिलया सः रक्षितः। मृत्यु-मुखात् सः आनीतः। इदानीं सः प्रेम्णा पाल्यते।

शिष्यः गुरुदेव! किं मौनं सर्वत्र फलदायकं भवति? (गुरुदेव! क्या मौन रहना हर जगह फलदायक होता है?) गुरुः आम् वत्स! (हाँ वत्स!) शिष्यः तर्हि मम 'रिजल्ट' (परीक्षाफल) दृष्ट्वा पितुः मौनं किमर्थं न अभवत्? (तो मेरा रिजल्ट देखकर पिताजी मौन क्यों नहीं हुए?)

# अध्यात्ममयं भारतम्



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

मनुष्यरूपेण भारते जन्म दुर्लभम् । सौभाग्यात् हि कथञ्चित् मनुष्यः भारते जन्म लभते । भारतीयज्ञानं विश्वदुर्लभम् । संस्कृतिः च अनुपमा, अध्यात्मोपेता च । पुण्यभूमि-भारतवर्षं धर्मशक्तिरूपा सम्पद् अस्ति । धर्मशक्तिर्हि दुःखदैन्यादिच्छायातो मनुष्यान् रक्षति । असौ भारतं हि पृथ्व्यां स्वर्गः, सुख-समृद्धि-सौन्दर्याणां धाम वर्तते । यः अस्मिन् देशे उत्पन्नः, यः अस्य अन्नजलादिभिः पालितः, पोषितश्च, यः अस्याः पुण्यभूमेः सेवकः स्यात्, यश्च एनं देशं हि स्वगृहं मन्यते, स वास्तविको भारतीयः कथ्यते । यः कोऽपि उत्तरमार्गीयः स्यात्, अथवा दक्षिणमार्गीयः, आर्यः स्याद् अथवा द्रविडः, ब्राह्मणः स्याद् अथवा हरिजनः, सः सर्वोऽपि भारतीयो हि वर्तते । अत्र यः कोऽपि वर्णीयः अथवा धर्मसम्प्रदायानुयायी भवेन्नाम, यदि स भारते भारतार्थं निवसेत्, जीवेत्, स्वश्रद्धाभक्तियुक्तं जीवनं भारतसेवायाम् उन्नत्याञ्च योजयेत्, अत्रस्थां संस्कृतिं, शास्त्रं, देवभाषां संरक्षणाय, वर्धनाय च प्रयतेत, तर्हि सः प्रकृतार्थतो भारतपुत्रो हि आख्यायते । चिच्छक्तेः अस्याम् आध्यात्मिकैकतायाम् अस्मद्देशस्य गौरवं गूहितमस्ति । अस्याः आधारभूतैकतायाः अभावाद्धि अस्मद्देशो वारं वारं दासत्वबन्धनेन बद्धो जातः। भारतं देवमनुष्याणाम् आशीर्वादात्मकं स्थानमस्ति। आध्यात्मिकज्ञानस्य प्रभुता सम्पत्तिः अत्रैव विद्यते । वेदः, उपनिषत्, गीता, रामायणं, भागवतं, महाभारतं, भारतशक्तिः, योगशक्तिः, साधुवाणी, सत्यानुभूतिः, अन्तर्ज्ञाननिधिः इत्यादयः सर्वेऽपि मानवकल्याणार्थम् अत्रैव उपलभ्यन्ते । वैज्ञानिकसंस्कृतौ अपि भारतं न अकिञ्चनं स्यात् कदाचिदपि । एवमेव सङ्गीतं, चित्रकला, मूर्तिनिर्माणकला, वास्तुशास्त्रम्, अस्त्रविद्या, फलितज्योतिषम् इत्यादिषु न कोऽपि इतरदेशः अद्यावधि भारततः अग्रेसरः अवलोक्यते । योगशास्त्रे तु भारतं सदा हि जगद्गुरुत्वेन हि तिष्ठति । अतः समुन्नतम् अध्यात्मं, संस्कारः, संस्कृतिः, समृद्धा संस्कृतभाषा, साहित्यम् इत्यादीनां स्थितिकारणतः भारतं सदैव भानुवत् प्रकाशमानं लोके तिष्ठतीति न सन्देहः, शुभम्

# हास्यकणिका

**शिष्यः-** गुरुदेव! किं मौनं सर्वत्र फलदायकं भवति?
**गुरुः** आम् वत्स! शिष्यः तर्हि मम 'रिजल्ट' (परीक्षाफलम्) दृष्ट्वा पितुः मौनं किमर्थं न अभवत्?

## पितापुत्रयोः संवादः

**पुत्रः-** पितामह! किं भवान् अन्धकारे लिखितुं शक्नोति? (दादाजी! क्या आप अंधेरे में लिख सकते हैं?)
**पितामहः** आम्, शक्नोमि। (हाँ, लिख सकता हूँ।)
**पुत्रः** तर्हि कृपया मम प्रगत्या-पत्रे (Progress Report) हस्ताक्षरं करोतु, अधुना विद्युत् नास्ति! (तो कृपया मेरे प्रगति-पत्र पर हस्ताक्षर कर दीजिए, अभी बिजली नहीं है!)